सारि शिखरम् … अखिलतापि …। चूतद्रुमैर्मर्दयति क्षितिरस्य … पिकाली: HarVi. i. 5. 139.

**अखिलतामस** (akhila–tāmasa) *n.* all darkness (व्यास:) स एवाद्य प्रसन्नात्मा हरत्वखिलतामसम् S'aṅkaVi.(Ā.) 231. 20.

**अखिलतारालोक** (akhila–tārāloka) *m.* the entire collection of stars, all the stars प्रलयमखिलतारालोकमह्नाय नीत्वा…गगनसलिलराशिं रात्रिकल्पावसाने मधुरिपुरिव भास्वानेष एकोऽधिशेते S'iśuVa. 11. 66.

**अखिलतीर्थ** (akhila–tīrtha) *n.* all the places of pilgrimage प्रणामसमये च मूर्धानमधिरोपितेन प्रकृतिपूतेन निजपादपांसुना संपादितमखिलतीर्थस्नानफलम् TilaMañ. 26. 7; युधिष्ठिर:…। जगामाखिलतीर्थानि सादर: पृथिवीपति: PadmP. i. 39. 120; विभीषणमशेषराजाधिपतिं विधातुमखिलतीर्थाहृतैरम्भोभि:… रघुपतिरभ्यषिञ्चत् RāmāCam. 6. 94(6)

**अखिलतीर्थसार्थक** (akhilatīrtha–sārthaka) *m.* the group of all sacred places स्नाता हि ते चाखिलतीर्थसार्थकै:(? का:)। स्नात्वेह ये वै मणिकर्णिकाह्रदे समासते मुक्तिजनाश्रयेक्षणम् SkandP. iv. 98. 36.

**अखिलतुष्टि** (akhila–tuṣṭi) *f.* satisfaction of all भक्तियोगम्…तमहमखिलतुष्ट्यै शास्त्रदृष्ट्या व्यनज्मि BhaktiRa. 1. 1.

**अखिलतुष्टिकृत्** (akhila–tuṣṭikṛt) *m.* name of Viṣṇu (gratifying all) अखिलतुष्टिकृत्…इति…विष्णोर्नामसहस्रकम् PañcaRā.(Nā.) iv. 3. 173 (? 123)

**अखिलतोषकृत्** (akhilatoṣa–kṛt) *m.* gratifing all desires अखिलतोषकृत्। पितृनुद्धरते यस्तु पुत्रवान्पुत्र उच्यते GaṇeP. i. 2. 30.

**अखिलत्रास** (akhila–trāsa) *m.* **i** all flaws अखिलत्रासवैधुर्यधुर्यो धार्य:… स्वहृदि…तत्त्वमुक्ताकलाप: TattvMu. 1. 3; **ii** every (kind of) fear, TattvMu. 1. 3.

**अखिलत्रिजगती** (akhila–trijagatī) *f.* all the three worlds वनिताजनानाम्…वपूंषि। …सुमनोविशिखस्य शस्त्राणीवाखिलत्रिजगतीजयबद्धबुद्धे: HammīMaKā. 6. 62.

**अखिलत्रिभुवन** (akhila–tribhuvana) *n.* all the three worlds दृष्ट्वा च तम्…अखिलत्रिभुवनराज्योचितम्…चन्द्रापीडस्य पस्पर्श विस्मयो हृदयम् Kād. 80. 4.

**अखिलत्रैलोक्य** (akhila–trailokya) *n.* all the three worlds योगिन: कथमखिलत्रैलोक्यवृत्तान्तदर्शिन:…ईश्वराद्विशिष्येरन् NyāyMañ. i. 99. 25; अखिलत्रैलोक्यचिन्तामणिम्।…सम्यक्त्वरत्नं कृती यो धत्ते हृदि तस्य नाथ सुलभा: स्वर्गापवर्गश्रिय: YaśasCam. ii. 378. 6; तस्य…महादेव्यामेकमखिलत्रैलोक्यतिलकस्तिलकमञ्जरीनामधेयं कन्यकारत्नमुत्पन्नम् TilaMañ. 168. 6; ĀgaPrā. 17. 7;' जातोऽसि धाता स्वयम्। यं शंसन्ति हिरण्यगर्भमखिलत्रैलोक्यजीवात्मकम् Nāray. ii. 7. 1; शोभते … कुम्भकर्णमेघनादयोरखिलत्रैलोक्यसारसमुद्धारसंभावितदो:स्तंभयोरासञ्जितनिखिलसंग्रामभारस्य स्वैरविहारो लङ्केश्वरस्य AdbhuDa. 6. 13(4)

**अखिलद** (akhila–da) *adj.* giving everything (वक्ष्ये मनुम्) किमत्र बहुनाखिलदम् PañcaRā.(Nā.) iii. 3. 5.

**अखिलदक्षिणश्रेणी** (akhila–dakṣiṇaśreṇī) *f.* the whole southern range of mountains तीरस्थितं तत्प्रासादरत्नमवलोकयितुमुत्तरात्सरस्तीरपुलिनादखिलदक्षिणश्रेणीपतेर्विद्याधरचक्रवर्तिनश्चक्रसेनस्य महिषी पत्रलेखाभिधाना … तत्रैवागच्छत् TilaMañ. 341. 8.

**अखिलदर्शन** (akhila–darśana) *n.* **i** all philosophical systems यं ब्रह्म निश्चितधिय: प्रवदन्ति साक्षात्तद्दर्शनादखिलदर्शनपारभाज:। तम् … पितरं नतोऽस्मि S'ivārkaMaDī. i. 1. 10 (*on* i. 1. 0); **ii** the whole science (of poetics) अखिलदर्शनवैयाकुली स्यात् RasGaṅ. 57. 8.

**अखिलदातृता** (akhiladātṛ–tā) *f.* nature or tendency of giving away everything, munificence किं धनै:। इति यो दधात्यखिलदातृतामयम्…पुरुषार्थलक्षणम् PṛthvīVi. 9. 71.

**अखिलदायाद** (akhila–dāyāda) *m.* all heirs क्षेत्रं तु अखिलदायादानुमत्या विभजनीयम् SmṛtiCan. iv. 645. 8.

**अखिलदाहक** (akhila–dāhaka) *adj.* burning everything स दग्ध्वा सकलं विश्वमस्त्रम्…। देवतानां शरीरेषु क्षिपत्यखिलदाहकम् KūrmaP. 783. 13 (2. 45)

**अखिलदिगङ्गना** (akhila–digaṅganā) *f.* ladies in the form of all the quarters अखिलदिगङ्गनोत्तरासङ्गीभूतकीर्तिक्षेम: क्षेम्य: AvantiKa. 149. 5.

**अखिलदिग्गज** (akhila–diggaja) *m.* all the quarter-elephants (guardians of the quarters) अखिलदिग्गजकुलावत्रासकेन ध्वनिना…जहास (स:) UdaySuKa. 78. 4.

**अखिलदिन** (akhila–dina) *n.* the whole day, all day long भ्रान्त्वा भ्रान्त्वाखिलदिनं सोऽजीवत्कणभिक्षया PariPar. 3. 187.

**अखिलदिविषद्वैरिन्** (akhila–diviṣadvairin) *m.* all the demons घोरक्रूराकृतिविकृततां किं जगत्कण्टकानामन्यत्तेषामखिलदिविषद्वैरिणां वर्णयाम: SrīKaC. 24. 17.

**अखिलदिश्** (akhila–diś) *f.* all the directions ऋक्षवानरैश्वर्यमखिलदिङ्मण्डलविषयम्…स्वामी प्रत्यपद्यत ĀścaCū. 6. 13(14); अखिलदिग्वलयावलोकिभिरवलोकितै:…मुनिबालकाभ्यां व्यलोकि भूप: YaśasCam. i. 146. 3; यस्य…शाखा: पुनरखिलदिगाभोग एवैष स स्तात् त्रैलोक्यप्रीतिहेतु: क्षितिप तव यश:पादप: YaśasCam. i. 171. 5; ग्रेन्थिथ स्रज इहाखिलदिक्षु। कीर्तिभि: DvyāśraKā. 8. 51; यथाहमेषाम् … वसुंधराभुजामखिलदिङ्मुखविसर्प(? र्पि)तोदग्रप्रतापतया … इक्ष्वाकुवंश्यानामवनीभृतां पश्चिमो न भवामि…तथा विधेहि TilaMañ. 58. 17; 163. 9; अहमखिलदिङ्मुखख्यातकीर्ति:…राज्ञो मेघवाहनस्यात्मजन्मा हरिवाहनो नाम कुमार: TilaMañ. 249. 1; 403. 5; UdaySuKa. 74. 28; अथ पर्यवष्टभ्य माम्, अमी सुगतागमसेनापतयो निरन्तरमखिलदिङ्मुखेभ्य: … शस्त्रवृष्टिभि: … व्यवाकिरन् AmṛUda. 1. 28(16)

**अखिलदु:ख** (akhila–duḥkha) *n.* all sorts of troubles or miseries आत्मज्ञानम्। …अखिलदु:खनिदानाज्ञाननिवर्तकम् LalitāTriBh. 270. 14 (*on* 8); भजनात् परया भक्त्या मनोवाक्कायकर्मभि:। तरत्यखिलदु:खानि तस्माद्भक्त इतीरित: KulārT. 17. 29; GaṇeP. i. 70. 26; सुखमहमस्वाप्समिति सुखानुभवानुसन्धानं पुनरखिलदु:खनिवृत्तिमात्रपरम् MānaMe. 204. 1.

**अखिलदु:खजाली** (akhiladuḥkha–jālī) *f.* a snare in the form of all sorts of troubles or miseries अखिलदु:खजाली…कलिकामिनीयम् PadyaVe. 388.

**अखिलदु:खद** (akhiladuḥkha–da) *adj.* [*f.* –ā] giving all sorts of troubles or miseries भक्तित्रिकं न यस्यास्ति काममोहादयो मुने। विकारास्तस्य सद्यो वै भवन्त्यखिलदु:खदा: S'ivaP. ii(1). 2. 52 (39A. 2); सौम्ये सपौषेऽखिलदु:खदा सा (सुरप्रतिष्ठा) VasiS. 40. 3.

**अखिलदु:खहन्** (akhiladuḥkha–han) *adj.* destroying or removing all troubles or miseries यज्ञं करोमि तव तुष्टिकरं व्रतं वा दैवं च पूजनमथाखिलदु:खहा त्वम् DevīBhāP. iv. 24. 58.

**अखिलदुरित** (akhila–durita) *n.* all calamities ध्यात्वोमां यजति जपति यदि धनपतिरखिलदुरितमपवाह्य स्यात् ĪśānS'iPa. i. 26. 101.

**अखिलदुर्ग** (akhila–durga) *n.* all difficulties, all obstacles or dangers भजनात् परया भक्त्या मनोवाक्कायकर्मभि:। तरत्यखिलदु:खानि (v. l. °दुर्गाणि) तस्माद्भक्त इतीरित: KulārT. 17. 29.

**अखिलदुर्गती** (akhila–durgatī) *f.* [metrical lengthening?] all sorts of misfortunes or calamities येऽश्रद्दधाना: शिवलिङ्गपूजां विधाय कृत्यं न समाचरन्ति। यथोचितं ते यमकिङ्करैर्हि पच्यन्त एवाखिलदुर्गतीषु BrahmP. 157. 24.

**अखिलदृग्द्रष्टृ** (akhiladṛg–draṣṭṛ) *adj.* the seer of all eyes, the knower of all minds, omniscient स्तवमानं तदा चेन्द्रमब्रवीत्कार्यगौरवात्। विज्ञायाखिलदृग्द्रष्टा महेशो लिङ्गरूपवान् SkandP. i(1). 17. 194; तास्तथा त्यक्तसर्वाशा: प्राप्ता आत्मदिदृक्षया। विज्ञायाखिलदृग्द्रष्टा प्राह प्रहसितानन: BhāgP. x. 23. 24 (Munibhāvaprakāśikā अखिलदृशां सर्वबुद्धीनां द्रष्टा)

**अखिलदृश्** (akhila–dṛś) *adj.* all-seeing, omniscient इत्थं विक्लवितं तस्य बुबुधेऽखिलदृग्विभु:। विनायक: GaṇeP. i. 34. 8; *f.* all eyes, the eyes of all अयमखिलदृशां रसायनश्री रथमधिरोहति नीलशैलनाथ: CaitaCa. 200. 3(8).

**अखिलदृशि** (akhila–dṛśi) *f.* sight of all नाहं खादिरपि स्फुटं मरुतलभ्राजत्पय:साम्यतस्तेभ्यो नित्यविलक्षणोऽखिलदृशि: सौरप्रकाशो यथा Prauḍhā. 4.

**अखिलदेव** (akhila–deva) *m.* all the gods कच्चिच्चाखिलदेवेभ्यो मन्यसेऽभ्यधिकं पतिम् MārkP. 16. 54.

**अखिलदेवता** (akhila–devatā) *f.* **A** chief deity, deity par excellence लक्ष्मीशपार्श्वनिलयाखिलदेवतेयम् (लक्ष्मी:) AhirbuS. 24. 18; **B** all the deities मन्त्रेण पूतं त्वां यागे पास्यन्त्यखिलदेवता: BrahmāṇḍP. iii. 28. 88; नरनाथ पुरा कृपाणमेनं विरचय्याखिलदेवतायुधांशै:। उपदीकृतवान् पिनाकपाणेर्दनुजानां विजयाय विश्वकर्मा MadhuVi. 8. 23; TattvPrakā. 222B. 11 (*on* iv. 4. 19)

**अखिलदेवतात्मन्** (akhiladevatātman) *adj.* identical with all the deities, representative of all the gods, the soul of all deities भगवान्…स:…। छन्दोमयो मखमयोऽखिलदेवतात्मा BhāgP. ii. 7. 11; महादेव:…अग्निर्मुखं तेऽखिलदेवतात्मा BhāgP. viii. 7. 26.

**अखिलदेवदृष्टि** (akhiladeva–dṛṣṭi) *f.* glimpse or vision of all the gods गुरूपदेशेन यदात्मदृष्टि: सैव प्रशस्ताखिलदेवदृष्टि: S'aṅkaDigVi.(Mā.) 14. 2.

**अखिलदेवावलि** (akhiladevāvali) *f.* series of all the gods त्वमखिलदेवावलिकृतसेवासंतति: StavMā. 244. 3; AnuVyā. 63B. 6 (*on* 3. 4)

**अखिलदेश** (akhila–deśa) *m.* all the territories or states ततो विनम्रेष्वधिरोप्य शासनं स वत्सराजोऽखिलदेशराजसु KathāSaSāg. iii. 6. 225.

**अखिलदेशस्थता** (akhiladeśastha–tā) *f.* the state of being present in the whole area (i. e. presence in all the lands or the whole land) एकैकत्रापि देशेऽनवस्थितस्याखिलदेशस्थता कुत एव भवेत् NyāySu.(Ja.) 347A. 2 (*on* ii. 2. 6)